सप्तमः पाठः

# शश-सिंहकथा



एकस्मिन् वने एकः भयंकरः सिंहः वसति स्म । स वने इच्छानुसारेण पशून् भोजनाय मारयति स्म। अतः सर्वे पशवः भीताः अभवन् । ते मिलित्वा विचारम् अकुर्वन् –

प्रतिदिनम् एकैकः पशुः सिंहस्य भोजनाय स्वयं गच्छतु । स्वविचारं ते सिंहस्य समीपं अस्थापयन्। तदा सिंहः ''आम्' इति अवदत् ।

एवम् एकैकः पशुः सिंहस्य भोजनकाले प्रतिदिनम् अगच्छत् । वने पशवः निश्चिन्ताः अभवन्।

एकस्मिन् दिवसे एकस्य शशस्य वारः आसीत् । सः विलम्बेन सिंहसमीपम् अगच्छत् । तस्य अल्पशरीरेण, विलम्बेन आगमने च सिंहः कुपितः अभवत् । सः अवदत्– रे दुष्ट ! कथं त्वम् एकाकी विलम्बेन च आगतः ? बुद्धिमान् शशः अवदत्– राजन् ! कोपं न कुरु । एकः अन्यः सिंहः मार्गे मिलितः। स गुहायां तिष्ठति ।

सिंहः अवदत्–कुत्र सः ? नय मां तत्र । हनिष्यामि तं दुष्टम् । शशः सिंहं कूपसमीपम् अनयत्। तत्र कूपे स्वच्छायाम् सिंहः अपश्यत् । अन्यं सिंहं मत्वा कोपेन सः कूपे अकूर्दत् । तत्र स कालेन मृतः। एवं शशस्य बुद्धिः सर्वान् पशून् अरक्षत् । अतः कथयन्ति–बुद्धिर्यस्य बलं तस्य ।

## शब्दार्थः

| | | |
|---|---|---|
| एकस्मिन् | = | एक (वस्तु) में |
| वसति स्म | = | निवास करता था |
| पशून् | = | पशुओं को |
| भीता अभवन् | = | डर गये/गयी |
| मिलित्वा | = | मिलकर |
| भोजनाय | = | भोजन के लिए |
| गच्छतु | = | जाय |
| वारः | = | बारी, पारी |
| एकाकी | = | अकेला |
| विलम्बेन | = | विलम्ब से |
| कुपितः | = | क्रोध से भरा हुआ |
| अभवत् | = | हुआ |
| अवदत् | = | बोला |
| कथम् | = | क्यों/कैसे |
| कुरु | = | करो |
| मार्गे | = | रास्ते में |
| हनिष्यामि | = | मार दूँगा |
| तं दुष्टम् | = | उस दुष्ट को |
| कूप-समीपम् | = | कुएँ के पास |
| अनयत् | = | ले गया |
| स्वच्छायाम् (स्व+छायाम्) | = | अपनी परछाईं को |
| अपश्यत् | = | देखा |
| मत्वा | = | समझकर |
| कोपेन | = | क्रोध से |
| अकूर्दत् | = | कूद गया |
| सर्वान् | = | सभी को |

| | | |
|---|---|---|
| कथयन्ति | = | कहते/कहती हैं |
| बुद्धिर्यस्य | = | जिसके पास बुद्धि है |
| ( बुद्धिः + यस्य ) | | |

## व्याकरणम्

| | | |
|---|---|---|
| एकस्मिन् | = | एक (सप्तमी एकवचन (पुं./नपुं.) |
| इच्छानुसारेण | = | इच्छा + अनुसारेण |
| एकैकः | = | एक + एकः |
| निश्चिन्ताः | = | निः + चिन्ताः |
| बुद्धिर्यस्य | = | बुद्धिः + यस्य |
| आसीत् | = | √अस् + लङ्लकार |
| हनिष्यामि | = | √हन् + लृट्लकार |
| अकूर्दत् | = | √कूर्द् + लङ्लकार |
| अगच्छत् | = | √गम् + लङ्लकार |
| अपश्यत् | = | √दृश् + लङ्लकार |

## अभ्यासः

### मौखिकः

1. **इन शब्दों का अर्थ बताएँ :–**

   भयंकरः, भोजनाय, पशवः, भीताः, तदा, विलम्बेन, आगतः, सर्वान्, अरक्षत्, बलम् ।

2. **'इच्छानुसारेण' के समान इन शब्दों को जोड़कर बताएँ :–**

   नियम + अनुसारेण, कर्म + अनुसारेण, विद्या + अनुसारेण, समय + अनुसारेण, धर्म + अनुसारेण

3. **इन शब्दों का पंचमी एकवचन में रूप बताएँ –**

**सिंह, शश, शरीर, कूप, बल**

4. **'तत्र' शब्द से युक्त पाँच वाक्य बोलें ।**

## लिखितः

5. **इन वाक्यों में रिक्त स्थानों को सही शब्दों से भरें :–**

(क) एकस्मिन् .............................. एकः भयंकरः सिंहः वसति स्म ।

(ख) सर्वे पशवः .............................. अभवन् ।

(ग) तदा सिंहः .............................. इति अवदत् ।

(घ) सः विलम्बेन सिंहसमीपम् .............................. ।

(ङ) .............................. बलं तस्य ।

6. अधोलिखित वाक्यों को तीन बार लिखें –

(क) जंगल में एक सिंह था – वने एकः सिंहः आसीत्।

(ख) वह इच्छानुसार भोजन करता है –सः इच्छानुसारेण भोजनं करोति।

(ग) गुस्सा मत करो – क्रोधं मा कुरु।

(घ) वह गुफा में रहता है – स गुहायां तिष्ठति।

(ङ) जिसके पास बुद्धि है उसी के पास बल है – बुद्धिर्यस्य बलं तस्य।

7. **इन शब्दों से वाक्य बनाएँ :–**

**भयंकरः, सिंहः, तदा, वने, बुद्धिमान्, कुत्र**

8. **इस कहानी से क्या शिक्षा मिलती है ? पाँच वाक्यों में लिखें ।**

9. **इस कहानी के आधार पर कोई कहानी लिखें ।**

**10. निम्नलिखित शब्दों का वर्णविच्छेद करें :–**

जैसे–वने = व् + अ + न् + ए (व = व् + अ; ने = न् + ए)

(क) वसति ................................................. ।

(ख) गच्छतु ................................................. ।

(ग) भीताः ................................................. ।

(घ) एकस्मिन् ................................................. ।

(ङ) राजन् ................................................. ।

**11. इनका सुमेल करें :–**

| | | | |
|---|---|---|---|
| (i) | सिंहः | (क) | भीताः |
| (ii) | शशः | (ख) | गर्जति |
| (iii) | पशवः | (ग) | लघुः पशुः |
| (iv) | विचारम् | (घ) | बलम् |
| (v) | बुद्धिः | (ङ) | अकुर्वन् |

12. संस्कृत में अनुवाद करें :–

(क) वह हँसता है ।

(ख) तुम दोनों पढ़ते हो ।

(ग) मैं लिखती हूँ ।

(घ) शाम्भवी दौड़ती है ।

(ङ) महेश जाता है ।

✦✦✦